**Ex/Sans/UG/Core/4.2/68/2019**

# BACHELOR OF ARTS EXAMINATION, 2019

(2nd Year, 4th Semester)

**SANSKRIT (Honours)**

**Course : IX**

**[ Epigraphy and Arthaśāstra ]**

Full Marks : 30 Time : Two Hours

*The figures in the margin indicate full marks.*

1. **पञ्च** प्रश्नाः सुरगिरा देवनागर्या लिप्या च समाधेयाः। 1×5=5

(क) कस्मिन् गुप्ताब्दे ख्रिस्टाब्दे च मथुरास्तम्भलेखोऽभिलिखितः ?

(ख) मथुरास्तम्भलेखे कस्य गुप्तराजस्य नाम अस्ति ? तस्य क उपाधिः तत्र दृश्यते ?

(ग) मथुरास्तम्भलेखः कया भाषया कां लिपिमवलम्ब्य च अभिलिखितः ?

(घ) भट्टभवदेवः कस्य मुनेर्वंशे जातः ?

(ङ) 'न ग्रन्थिलो न कुटिलः' ... इत्यादौ 'ग्रन्थिल'-शब्दस्य भट्टभवदेवस्य वंशपक्षे अर्थो नि रूप्यताम्।

(च) प्रथमभवदेवस्य अग्रजानुजयोर्नाम्नी लिख्येताम्।

(छ) भट्टभवदेवस्य पृष्ठपोषकनृपतेर्नाम किम् ? स कीदृशो नृपतिरासीत्।

(ज) भट्टभवदेवेन विष्णोः गर्भगृहान्तरेषु केषां मूर्त्तयः प्रतिष्ठापिताः ?

[*Turn over*]

2. अधोलिखितेषु **द्वौ प्रश्नौ** समाधेयौ। 5×2=10

(क) केन किमर्थञ्च गुर्वायतने कौ गुरु प्रतिष्ठापितौ? लेखादस्मात् तस्य प्रतिष्ठातुर्धर्मीयभावविषयकं किं तथ्यं ज्ञापितम्?

(ख) भूवनेश्वरप्रशस्तेरावस्थानिकैतिहासिकत्वं गवेषकैः यदुपलब्धं तत्समासेन वक्तव्यम्।

(ग) भूवनेश्वरप्रशस्तौ हरिणा सह भट्टभवदेवस्य साम्यं कथं प्रतिपादितम्?

(घ) भट्टभवदेवेन निर्मितस्य जलाशयस्य प्रासादस्य च विवरणं देयम्।

3. **पञ्च** प्रश्नाः सुरगिरा देवनागर्या लिप्या च समाधेयाः। 1×5=5

(क) किं नाम 'चौलकर्म'?

(ख) 'विनय' इत्यस्य कोऽर्थः?

(ग) का नाम प्रज्ञा? सा कथमुपजायते?

(घ) मानात् के राजानो विनष्टा अभवन्?

(ङ) नृपः कथं कामं सेवेत?

(च) अग्न्यागारतः केषां कार्यं नृपः कथं पश्येत्?

(छ) परविषये अकृत्यान् कथं प्रशमयेत्?

(ज) लुब्धवर्गेषु केषां ग्रहणम्?

(झ) वैदेहकव्यञ्जनस्य स्वरूपं किम्?

4. अधोलिखितेषु **द्वौ प्रश्नौ समाधेयौ**। 5×2=10

(क) स्वविषये कृत्याकृत्यानां तुष्टातुष्टत्वं कथं ज्ञायते? कथं वा राजा स्वविषये तुष्टातुष्टान् साधयेत्?

[*Turn over*]

(ख) राजपुत्रेभ्यः राज्ञो रक्षाविषये कौटिल्यस्य पूर्वाचार्याणां मतं सयौक्तिकं विचार्यताम्।

(ग) दिवसस्याष्टभागे राज्ञः कानि कर्तव्यानि निर्दिष्टानि?

(घ) को नाम इन्द्रियजयः? राज्ञः कृते इन्द्रियजयस्योपयोग आलोच्यताम्।